Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XVIII : July to December – 2021

# व्याप्तिस्वरूपे साध्याभावाधिकरणवृत्तित्वसामान्याभावविचार:

डा. वि. वि. एस्. आर्. लक्ष्मीः
सहायकप्राध्यापिका, न्याय-वैशेषिक विभागः
कर्नाटक संस्कृत विश्वविद्यालयः, बेङ्गळूरु

**उपोद्घातः -**

धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु आत्यन्तिकदुःखनिवृत्त्यात्मको मोक्ष एव परमपुरुषार्थः। मोक्षहेतुनिरूपणार्थमेव दर्शनानां प्रादुर्भावः । दृश्यते अनेन इति दर्शनम्। येन साधनेन इदं विश्वम्, इदं वस्तुजातम्, जीवात्मा, प्रकृतिश्च याथातथ्येन दृश्यते, समीक्ष्यते, तद्दर्शनम्। तच्च दर्शनम् आस्तिकनास्तिकभेदेन द्विविधम् । वेदप्रामाण्यं ये अभ्युपगच्छन्ति ते आस्तिकाः, तेषां दर्शनमास्तिकदर्शनम् इति । ये वेदप्रामाण्यं नाभ्युपगच्छन्ति ते नास्तिकाः, तेषां दर्शनं नास्तिकदर्शनम् इति। आस्तिकदर्शनानि-न्याय, वैशेषिक, सांख्य, योग, पूर्वमीमांसा, उत्तरमीमांसा इति । नास्तिकदर्शनानि-चार्वाकम्, जैनम्, बौद्धम् चेति ।

**न्यायदर्शनम् -**

वेदप्रामाण्यं पुरस्कृत्य प्रवृत्तानि दर्शनानि आस्तिकदर्शनानि । तत्र च अन्यतमं भवति न्यायदर्शनम्। न्यायशास्त्रस्य प्राचीनाभिधानमान्वीक्षिकी वर्तते । तथा हि- "याऽऽन्वीक्षिकी आत्मविषये विचारं कुरुते सा दर्शन"मिति कथ्यते । मनुरपि आन्वीक्षिकीम् आत्मविद्यावदमन्यत, प्रयोगश्च विहितः । तथा हि -

**त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम् ।**
**आन्वीक्षिकीञ्चात्मविद्यां वार्तारम्भाश्च लोकतः ॥** १ इति

**न्यायशास्त्रे अनुमानप्रामाण्यस्य वैशिष्ट्यम् -**

न्यायदर्शनस्य प्रमाणतन्त्रम्, प्रमाणविद्या इति च प्रसिद्धिः। पदार्थोद्देशसूत्रे प्रमाणमेव प्रथमं सूत्रयता गौतमेन प्रमाणस्यैव स्वशास्त्रप्रधान प्रमेयत्वं समसूचि ।

---

१. मनुस्मृतिः (म.स्मृ)- मनुः बालसरस्वती डिपो, मद्रास् ।

परमकारुणिकेन महर्षिणा गौतमेन षोडशपदार्थाः यद्यपि उद्देशलक्षणपरीक्षादिभिः निरूपिताः तथापि सर्वेपदार्थाः प्रमाणाधीनाः इति। सर्वेषां पदार्थानां तत्त्वनिर्णयाय प्रमाणतत्त्वं सम्यग्विवेचनीयमित्याशयेन नव्यन्यायशास्त्रप्रवर्तकत्वेन गङ्गेशोपाध्यायेन **"प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि"**२ इत्येकमेव सूत्रमवलम्ब्य चिन्तामणिनाम्ना अतिमहान् ग्रन्थः निरमायि । न्यायशास्त्रे तावत् चत्वारि प्रमाणानि अङ्गीकृतानि तद्यथा प्रत्यक्षानुमानोपमानशब्दाः इति प्रमाणचतुष्टयेषु अनुमानस्यैव प्राधान्यं न्यायमते मुख्यतया प्रतिपादयन्ति। ये तावत्तर्करसिका भवन्ति ते प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्त इति प्रसिद्धिरपि वर्तते । तद्यथा- **"प्रत्यक्षपरिकलितमप्यर्थम् अनुमानेन बुभुत्सन्ते तर्करसिकाः"** इति वचनमनुमानगतं वैलक्षण्यं विद्योतयति।

न्यायसूत्रेषु अनुमानसम्बन्धि एकमेव सूत्रमुपलभ्यते । तथा हि - **"अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतोदृष्टञ्च"**३ इति। अस्मिन् सूत्रे महर्षिः गौतमोऽनुमानलक्षणं तद्विभागञ्च सहैव करोति । तत्पूर्वकमित्यनेन सपक्षेषु लिङ्गलिङ्गिनोः साहचर्यदर्शनेन व्याप्यव्यापकभावसम्बन्धग्रहो भवति । पक्षे च लिङ्गप्रत्यक्षं गृह्यते । सपक्षे साध्यसाधनयोः सम्बद्धयोरेव प्रत्यक्षं भवतीति, पक्षे साध्यसाधनयोरन्यतरस्य साधनस्य दर्शनाद् एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमित्यनेन न्यायेन साध्यस्मृतिर्जायते । एवञ्च साधनप्रत्यक्षेण साध्यस्मृतिर्भवतीति, दृष्टेन साधनेनाऽप्रत्यक्षस्य साध्यस्य पक्षेऽनुमितिर्भवति । तच्चानुमानं त्रिविधम् (१)पूर्ववत् (२) शेषवत् (३) सामान्यतोदृष्टम् च ।

नवीनाः तावत् अनुमानं द्विधा विभक्तं वर्तते । तच्च स्वार्थं-परार्थञ्चेति।

तत्रानुमितिकरणमनुमानमिति अनुमानसामान्यलक्षणमिति तर्कसंग्रहे प्रतिपादितम् । ततः परं का नाम अनुमितिः इति जिज्ञासायां परामर्शजन्यं ज्ञानमनुमितिः इति अनूदितम् ।

---

२. न्यायभाष्यम् (न्या.भा.)-महर्षि गौतम कृत न्यायसूत्राणां श्रीवात्स्यायन मुनि प्रणीतं, सुधीप्रकाशनम्, वारणासी ।

३. न्यायसूत्रम् (न्या.सू.) - महर्षिः गौतमः, भाष्यखद्योतभाष्यचन्द्रयुक्तम्, संस्कृत सीरिइस आफिस, विद्याविलास प्रेस, वारणासी ।

Scanned with CamScanner

तदनु को नाम परामर्शः इत्याशङ्कायां व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः इति भणितम् । तत्र का नाम व्याप्तिः इति जिज्ञासायां व्याप्तेः बहूनि लक्षणानि प्रतिपादितानि वर्तन्ते । व्याप्तेः पूर्वपक्षलक्षणानि अनूद्य केवलान्वयिनि सद् हेतौ अव्याप्तिः भवति इति सिदान्तव्याप्तिलक्षणम् प्रदर्शितम् गङ्गेशोपाध्यायः अस्मिन् पत्रे पूर्वपक्षव्याप्तेः प्रथमलक्षणे वृत्तित्वसामान्याभावविचारः कृतः -

**साध्याभाववदवृत्तित्वम्**४ पूर्वपक्षव्याप्तेः प्रथमलक्षणम्। साध्याभावाधिकरणनिरूपितवृत्तित्वाभावः व्याप्तिरिति लक्षणार्थः । एवञ्च साध्यनिष्ठप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः व्याप्तेः स्वरूपलक्षणम् इति फलितम्। **"साध्यनिरूपिता हेतुनिष्ठा व्याप्तिः"** इति नियमानुसारेण हेतौ समन्वयः । तथा हि- पर्वतो वह्निमान् धूमादित्यत्र साध्यो वह्निः, साध्यनिष्ठप्रति-योगितानिरूपकाभावः वह्निनिष्ठप्रतियोगितानिरूपकः वह्निर्नास्तीत्याकारक-प्रतीतिसिद्धाऽभावः, तादृशाभावाधिकरणं जलह्रदः, तन्निरूपितवृत्तित्वं मीन शैवालादौ, वृत्तित्वाभावः धूमे वर्तत इति लक्षणसमन्वयः। पर्वतो धूमवान् वह्नेः इत्यत्र धूमनिष्ठप्रतियोगितानिरूपकाभावः धूमो नास्तीत्याकाराकप्रतीतिसिद्धाभावः, तादृशाभावाधिकरणं तप्ताऽयोगोलकं, तन्निरूपितवृत्तित्वमेव वह्नाविति नातिव्याप्तिः ।

**साध्याभावाधिकरणवृत्तित्वसामान्याभावविचारः -**

साध्याभावाधिकरणवृत्तित्वाभावश्च तादृशवृत्तित्वसामान्याभावो बोध्यः। अन्यथा पर्वतो धूमवान् वह्नेः इत्यत्र धूमाभाववद्ध्रदनिरूपितवृत्तित्वाभावः वह्नौ वर्तत इत्यतिव्याप्तिः । अतः वृत्तित्वाभावः इत्यनेन वृत्तित्वसामान्याभावो ग्राह्यः । तथा च लक्षणमित्थं फलति "साध्याभावाधिकरणनिरूपितवृत्तित्वत्वावच्छिन्नाभावः" व्याप्तिरिति एवञ्च साध्याभावाधिकरणनिरूपितवृत्तित्वत्वावच्छिन्नाभावः इत्यनेन धूमाभाववद्ह्रदनिरूपितवृत्तित्वाभावो नैव ग्राह्यः अपि तु धूमाभावाधिकरणवृत्तित्वं नास्ति इत्याकारकाभाव एव ग्राह्यः तथा च धूमाभावाधिकरण अयोगोलकादि (यत्किञ्चित् विशेषव्यक्ति) वृत्तित्वसत्त्वे,

---

४. व्याप्तिपञ्चकरहस्यम् (व्या.प.र.) - मथुरानाथतर्कवागीशः गङ्गानिर्झरणी व्याख्यया संकलितम्, चौखम्पा संस्कृत सीरिइस आफिस, विद्याविलास प्रेस, वारणासी ।

Scanned with CamScanner

धूमाभावाधिकरणवृत्तित्वत्वावच्छिन्नाभावः वह्नौ नायातीति नातिव्याप्तिः।

अस्मिन् स्थलेऽतिव्याप्तिः न्यूनवारकपर्याप्तिनिवेशनेनैव वारयितुं शक्यते। तथा हि -न्यूनवारकपर्याप्तिनिवेशप्रकारस्तु **"साध्याभावनिष्ठावच्छेदकतानिरूपिकाऽधिकरणत्वनिष्ठावच्छेदकतानिरूपिका, याऽधिकरणनिष्ठावच्छेदकता, तन्निरूपिका वृत्तितात्वनिष्ठावच्छेदकतानिरूपिका च या वृत्तित्वनिष्ठा प्रतियोगिता, तन्निरूपकाभावो" व्याप्तिः इति** । एवञ्च धूमाभावनिष्ठावच्छेदकतानिरूपिकाऽधिकरणत्वनिष्ठावच्छेदकतानिरूपिका याऽधिकरणनिष्ठा अवच्छेदकता ह्रदात्मकाधिकरणनिष्ठावच्छेदकता न भवति, यतः एतादृशी अवच्छेदकता ह्रदत्वनिष्ठावच्छेदकतानिरूपिका एव, न तु अधिकरणत्वनिष्ठा- वच्छेदकतानिरूपिका इति ह्रदनिरूपित-वृत्तित्वाभावमादाय नातिव्याप्तिरिति वृत्तित्वसामान्याभाव निवेशो व्यर्थः ।

एवमपि अस्मिन्नेव स्थले धूमाभावाधिकरणह्रदनिरूपितवृत्तित्वाभावमादायाऽतिव्याप्तिः भवत्येव। तथा हि-साध्याभावनिष्ठावच्छेदकतानिरूपिका अधिकरणत्वनिष्ठावच्छेदकतानिरूपिका याऽधिकरणनिष्ठा अवच्छेदकता इत्यनेन **"अधिकं तु"** इत्यादि न्यायेन अर्थात् अधिकं तु प्रविष्टं न तद्धान्यै इत्यनेन धूमाभावाधिकरणह्रदनिष्ठावच्छेदकता ग्राह्या। तादृशाधिकरणनिष्ठा- वच्छेदकता निरूपिका वृत्तितात्वनिष्ठा-वच्छेदकतानिरूपिका या वृत्तित्वनिष्ठा प्रतियोगिता इत्युक्तौ धूमाभावाधिकरणह्रदनिरूपितवृत्तित्वं नास्तीत्याकारकाभावीयवृत्तित्वनिष्ठा प्रतियोगिता भवति, तन्निरूपकाभावः वह्नाविति अतिव्याप्तिः। एतादृशातिव्याप्तिस्तु इतरवारकपर्याप्तिनिवेशनेन वारयितुं शक्यते। इतरवारकपर्याप्तिनिवेशप्रकारस्तु-**"साध्याभावनिष्ठावाच्छेदकताभिन्नाऽधिकरणत्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका, एतादृशावच्छेदकता- द्वयनिरूपिका याऽधिकरणनिष्ठावच्छेदकता तन्निरूपिका या वृत्तित्वनिष्ठा प्रतियोगिता तन्निरूपकाभावो" व्याप्तिः इति।** एवं च धूमाभावाधिकरणह्रद- निष्ठावच्छेदकता, साध्याभावनिष्ठावच्छेदकता-भिन्नाऽधिकरणत्वनिष्ठावच्छेद-कताभिन्ना याऽवच्छेदकता ह्रदत्वनिष्ठावच्छेदकता, तन्निरूपिका एव भवति, तदनिरूपिका न भवतीति, धूमाभावाधिकरणह्रदनिरूपितवृत्तित्वाभावमादाय नातिव्याप्तिः। अतः अस्मिन् स्थले अतिव्याप्तिवारणार्थम् **साध्याभावनिष्ठावच्छेदकताभिन्नाऽधिकरणत्वनिष्ठाव-**

-च्छेदकताभिन्नाऽधिकरणत्वनिष्ठावच्छेदताभिन्ना च याऽवच्छेदकता, तदनिरूपिका एतादृशावच्छेदकताद्वयनिरूपिका याऽधिकरणनिष्ठावच्छेदकता, तद्भिन्ना वृत्तिता-त्वनिष्ठावच्छेदकताभिन्ना च याऽवच्छेदकता, तदनिरूपिका एतादृशावच्छेद-कताद्वयनिरूपिका या वृत्तित्वनिष्ठप्रतियोगिता तन्निरूपकाभावः इत्यर्थक-वृत्तित्वसामान्याभावपर्यन्तनिवेशो व्यर्थः ।

यदि एतादृशरीत्या वृत्तित्वसामान्याभावनिवेशो व्यर्थ इत्युच्येत, तर्हि धूमवान् वह्नेः इत्यत्रैव धूमाभाववद्वृत्तित्वजलत्वोभयाभावमादायाऽतिव्याप्तिः, अर्थात् धूमाभावाधिकरणनिरूपितवृत्तित्वजलत्व-उभयनिष्ठप्रतियोगिताका-भावमादायाऽतिव्याप्तिः। तथाहि धूमाभावनिष्ठावच्छेदकताभिन्नाधिकरणत्व-निष्ठावच्छेदकताभिन्ना याऽवच्छेदकता, तदनिरूपिका, एतादृशावच्छेदकता-द्वयनिरूपिका याऽधिकरणनिष्ठा अवच्छेदकता धूमाभाववदयोगोलकात्मका-धिकरणनिष्ठा अवच्छेदकता, तन्निरूपिका या वृत्तित्वनिष्ठा प्रतियोगिता धूमाभाववद्वृत्तित्वनिष्ठा प्रतियोगिता, तादृश प्रतियोगिताकाभावः धूमाभाव-वद्वृत्तित्वजलत्व-उभयाभावः, वह्नौ धूमाभाववद्वृत्तित्वस्य सत्त्वेऽपि, जलत्व -स्याभावात् उभयाभावो वर्तते इत्यतिव्याप्तिः । अतः वृत्तित्वसामान्या- भावपर्यन्तं वक्तव्यमेव । तथाहि-उभयाभावीयप्रतियोगितायाः तादृशाधिकरण- निष्ठा-अवच्छेदकताभिन्ना वृत्तितात्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता जलत्वत्वोभयत्वनिष्ठा अवच्छेदकता, तन्निरूपकत्वेन, तदनिरूपकत्वस्य तादृशप्रतियोगितायामभावेन तादृशोभयाभावमादाय नातिव्याप्तिः ।

नन्वेवं कथने अर्थात् साध्याभावाधिकरणनिरूपितवृत्तितात्वेतरधर्मा-वच्छिन्नवृत्तितात्वावच्छिन्न-प्रतियोगिताकाभावः इति कथने, वह्निमान् धूमात् इत्यत्राव्याप्तिः। तथाहि, वह्न्यभावाधिकरणनिरूपित-वृत्तित्वाभावीयप्रतियोगितायाः वृत्तितात्वे- तरेण निरूपितत्वसम्बन्धेन वह्नयभावाधिकरणेनावच्छिन्नतया वह्न्यभावाधिकरणनिरूपितवृत्तित्वाभावः तादृशवृत्तितात्वेतरनिरूपितत्वसम्बन्धा-वच्छिन्नवह्नयभावाधिकरणरूपधर्मावच्छिन्नप्रतियोगिताकाभाव एव, न तादृश वृत्तितात्वेतरधर्मानवच्छिन्नवृत्तितात्वावच्छिन्न-प्रतियोगिताकः इति तादृशाभावः लक्षणघटको न भवतीत्यव्याप्तिः । तद्वारणार्थं वृत्तितानिष्ठप्रतियोगितायां वृत्तितात्वनिष्ठावच्छेदकताभिन्नत्वे सती साध्याभावाधिकरणनिष्ठावच्छेदकता-

Scanned with CamScanner

भिन्ना याऽवच्छेदकता तदनिरूपकत्वं निवेश्यते । तथाच धूमवान् वह्नेः इत्यत्र नातिव्याप्तिः। तथाहि, वृत्तित्वजलत्वोभयाभावीयप्रतियोगिता धूमाभावाधिकरणनिष्ठावच्छेदकता भिन्नावच्छेदकतानिरूपिका एव भवति, धूमाभावाधिकरणनिष्ठावच्छेदकताभिन्नोभयत्वनिष्ठावच्छेदकता निरूपकत्वात्। एवं च वृत्तित्वजलत्व-उभयाभवीयप्रतियोगिता वृत्तितात्वनिष्ठावच्छेदकताभिन्ना साध्याभावाधिकरणनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका न भवतीति तादृशाभावमादाय नातिव्याप्तिः ।

एवं वह्निमान् धूमात् इत्यत्र नाव्याप्तिः। तथा हि, वह्न्यभावाधिकरणवृत्त्यभावीयप्रतियोगिता, वृत्तितात्वनिष्ठावच्छेदकताभिन्ना वह्न्यभावाधिकरणनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता घटत्वादिनिष्ठा अवच्छेदकता, तदनिरूपिका भवतीति नाव्याप्तिः।

एवं सति धूमवान् वह्नेः इत्यत्रातिव्याप्तिः धूमाभावाधिकरणत्वेन ह्रदं गृहीत्वा धूमाभावाधिकरणह्रद-निरूपितवृत्तित्वाभावः वह्नौ वर्तते इत्यतिव्याप्तिः। तथा हि, ह्रदनिष्ठावच्छेदकता धूमाभावाधिकरणनिष्ठावच्छेदकताभिन्ना न भवति, एवं च धूमाभावाधिकरणह्रदनिरूपितवृत्त्यभावीयप्रतियोगिता वृत्तितात्वनिष्ठावच्छेदकताभिन्ना ह्रदात्मकसाध्याभावाधिकरणनिष्ठावच्छेदकता भिन्ना याऽवच्छेदकता तदनिरूपिका भवतीति अतिव्याप्तिः, अत्रातिव्याप्तिवारणाय साध्याभावाधिकरणनिष्ठावच्छेदकतायां साध्याभावाधिकरणत्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपकत्वं निवेशनीयम्। तथा च धूमवान् वह्नेः इत्यत्र नातिव्याप्तिः। तथा हि, साध्याभावाधिकरणत्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता ह्रदत्वनिष्ठावच्छेदकता, तन्निरूपिका एव भवति ह्रदात्मकधूमाभावाधिकरणनिष्ठावच्छेदकता, तदनिरूपिका न भवतीति तादृशाभावमादाय अतिव्याप्तिः न भवति ।

इत्थञ्च साध्याभावाधिकरणत्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका साध्याभावाधिकरणत्वनिष्ठस्वरूपसम्बन्धावच्छिन्नावच्छेदकतानिरूपिका, याऽधिकरणनिष्ठावच्छेदकता, तादृशावच्छेदकताभिन्ना वृत्तितात्वनिष्ठावच्छेदकताभित्रा याऽवच्छेदकता तदनिरूपिका, वृत्तितात्वनिष्ठावच्छेदकतानिरूपिका, निरूपितत्वसम्बन्धावच्छिन्नाधिकरणनिष्ठावच्छेदकता निरूपिका

Scanned with CamScanner

या वृत्तित्वनिष्ठप्रतियोगिता, तादृशप्रतियोगिताकाभावः व्याप्तिः इति फलति ।

नन्वेवं लक्षणकथनेऽपि धूमवान् वह्नेः इत्यत्रातिव्याप्तिः। तथा हि, साध्याभावाधिकरणत्व- निष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका या साध्याभावाधिकरणनिष्ठनिरूपितत्वसम्बन्धावच्छिन्ना याऽवच्छेदकता तन्नि - रूपिका वृत्तिता इत्युक्तौ जलवद्ह्रदनिरूपितत्वसम्बन्धेन धूमाभावाधिकरण-विशिष्टवृत्तिता तच्च मीनशैवालादौ, तदभावः वह्नौ वर्तते इत्यतिव्याप्तिरिति चेत्, न। निरूपितत्व(सम्बन्ध)निष्ठप्रतियोगितावच्छेदकतायां निरूपितत्वत्व-निष्ठावच्छेदकताभिन्ना याऽवच्छेदकता, तदनिरूपकत्वस्य विवक्षितत्वात् । तेन न पूर्वोक्तातिव्याप्तिः । तथा हि, साध्याभावाधि करणत्वनिष्ठावच्छेदकता-भिन्नावच्छेदकत्वानिरूपिका याऽधिकरणनिष्ठावच्छेदकता, तन्निरूपिका निरू-पितत्वत्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता ह्रदनिरूपितत्ववैशिष्ट्यनिष्ठा-वच्छेदकता, तन्निरूपिका एव भवति जलवद्ह्रदनिरूपितत्वावच्छिन्नधूमाभावा-धिकरणनिरूपितत्वनिष्ठावच्छेदकता, तदनिरूपिका न भवतीति तादृशवृत्तित्वा-भावमादाय अतिव्याप्तिः न सम्भवति ।

इत्थञ्च साध्याभावाधिकरणत्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका याऽधिकरणनिष्ठावच्छेदकता, तन्निरूपिका निरूपितत्वत्वनिष्ठा-वच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका निरूपितत्वनिष्ठावच्छेदकता-निरूपिका वृत्तित्वनिष्ठप्रतियोगिताकाभावः व्याप्तिः इति फलति ।

## उपुयक्तग्रन्थसूची, सङ्केताक्षरसूची च –


१. मनुस्मृतिः (म.स्मृ) - मनुः बालसरस्वती डिपो, मद्रास् ।

२. न्यायभाष्यम् (न्या.भा.)- महर्षि गौतम कृत न्यायसूत्राणां श्रीवात्स्यायनमुनि प्रणीतं, सुधीप्रकाशनम्, वारणासी ।

३. न्यायसूत्रम् (न्या.सू.) – महर्षिः गौतमः, भाष्यखद्योतभाष्यचन्द्रयुक्तम्, संस्कृत सीरिइस आफिस, विद्याविलास प्रेस, वारणासी ।


Scanned with CamScanner

४. व्याप्तिपञ्चकरहस्यम् (व्या.प.र.)- मथुरानाथतर्कवागीशः गङ्गानिर्झरणीव्याख्यया संकलितम्, चौखम्पा संस्कृत सीरिइस आफिस, विद्याविलास प्रेस, वारणासी ।

**Dr. V. V. S. R Lakshmi**
Assistant Professor
Dept. of Nyaya-Vaisheshika
Karnataka Sanskrit University
Chamaraja Pete-560018,
Bengaluru, Karnataka
Mobile No. : 9398712450
E-mail : sri.nikhilesh@gmail.com

*******

Scanned with CamScanner